श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

# ॥ चित्रपद्धतिः त्रिंशी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

# ॥ चित्रपद्धतिः त्रिंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

प्रतिष्ठां सर्वचित्राणां प्रपद्ये मणिपादुकाम्।
विचित्रजगदाधारो विष्णुर्यत्र प्रतिष्ठितः॥ **30.1** ॥

शृणु ते पादुके ! चित्रं चित्राभिर्मणिभिर्विभोः।
युगक्रमभुवो वर्णान् युगपद्वहसे स्वयम्॥ **30.2** ॥

सुरासुरार्चिता धन्या तुङ्गमङ्गळपालिका।
चराचराश्रिता मान्या रङ्गपुङ्गवपादुका॥ **30.3** ॥

पद्मेव मङ्गळसरित् पारं संसारसन्ततेः।
दुरितक्षेपिका भूयात् पादुका रङ्गभूपतेः॥ **30.4** ॥

अनन्यशरणः सीदन् अनन्तक्लेशसागरे।
शरणं चरणत्राणं रङ्गनाथस्य संश्रये॥ **30.5** ॥

प्रतिभायाः परं तत्त्वं बिभ्रती पद्मलोचनम्।
पश्चिमायामवस्थायां पादुके ! मुह्यतो मम॥ **30.6** ॥

यामः श्रयति यां धत्ते यैन यात्याय याच्च या।
याऽस्य मानाय यै वान्या सा मामवतु पादुका॥ **30.7** ॥

चर्या नः शौरिपादु ! त्वं प्रायश्चित्तेष्वनुत्तमा।
निवेश्यसे ततः सद्भिः प्रायश्चित्तेष्वनुत्तमा॥ **30.8** ॥

रामपादगता भासा सा भाता गदपामरा।
कादुपानञ्च कासह्या ह्यास काञ्चनपादुका॥ **30.9** ॥

बाढाघाळीझाटतुच्छे गाथाभानाय फुल्लखे।
समाधौ शठजिच्चूडां वृणोषि हरिपादुके !॥ **30.10** ॥

सा भूपा रामपारस्था विभूपास्तिसपारता।
तारपा सकृपा दुष्टिपूरपा रामपादुका॥ **30.11** ॥

कारिका न न यात्राया या गेयाऽस्यस्य भानुभा।
पादपा हह सिद्धासि यज्ञाय मम साऽञ्जसा॥ **30.12** ॥

सराघवा श्रुतौ दृष्टा पादुका सनृपासना।
सलाघवा गतौ श्लिष्टा स्वादुर्मे सदुपासना॥ **30.13** ॥

काव्यायास्थित मावर्ग व्याजयातगमार्गका।
कामदा जगतः स्थित्यै रङ्गपुङ्गवपादुका॥ **30.14** ॥

सुरकार्यकरी देवी रङ्गधुर्यस्य पादुका।
कामदा कलितादेशा चरन्ती साधुवर्त्मसु॥ **30.15** ॥

भरताराधितां तारां वन्दे राघवपादुकाम्।
भवतापाधितान्तानां वन्द्यां राजीवमेदुराम्॥ **30.16** ॥

कादुपास्यसदालोका कालोदाहृतदामका।
कामदाऽध्वरिरंसाकाऽकासा रङ्गेशपादुका॥ **30.17** ॥

पापाकूपारपाळीपा त्रिपादीपादपादपा।
कृपारूपा जपालापा स्वापा माऽपान्नृपाधिपा॥ **30.18** ॥

स्थिरागसां सदाराध्या विहताकततामता।
सत्पादुके ! सरासा मा रङ्गराजपदं नय॥ **30.19** ॥

स्थिता समयराजत्पा गतरा मादके गवि।
दुरंहसां सन्नतादा साध्यातापकरासरा॥ **30.20** ॥

लोकताराकामचारा कविराजदुरावचा।
तारा गते पादराऽऽम राजते रामपादुका॥ **30.21** ॥

जयामपापामया जयामहे दुदुहे मया।
महेशकाकाशहेम पादुकाऽममकादुपा॥ **30.22** ॥

पापादपापादपापा पादपाददपादपा।
दपादपापादपाद पादपाददपादपा॥ **30.23** ॥

कोपोद्दीपकपापेऽपि कृपापाकोपपादिका।
पूदपादोदकापादोद्दीपिका काऽपि पादुका॥ **30.24** ॥

ततातत्तातितत्तेता तातती तेतितातितुत्।
तत्तत्तत्तातततितता ततेतातेततातुता॥ **30.25** ॥

यायायायायायायायायायायायायायायायाया।
यायायायायायायाया या या या या या या या या॥ **30.26** ॥

रघुपतिचरणावनी तदा
    विरचितसञ्चरणा वनीपथे।
कृतपरिचरणा वनीपकैः
    निगममुखैश्च रणावनीगता॥ **30.27** ॥

दत्तकेळिं जगत्कल्पनानाटिका
    रङ्गिणा रङ्गिणा रङ्गिणा रङ्गिणा।

तादृशे गाधिपुत्राध्वरे त्वां विना
    पादुका पादुका पादुका पादुका ॥ **30.28** ॥

पादपापादपापादपापादपा
    पादपापादपापादपाऽपादपा।
पादपापादपापादपापादपा -
    पादपापादपापाऽऽदपापादपा ॥ **30.29** ॥

साकेतत्राणवेळाजनिततततनिज प्राङ्कण श्रीप्रभासा
    साभा प्रश्रीरटव्यामियममयमिव्यापदुच्छेदिलासा।
सालादिच्छेदतिग्माहवरुरुरुवह ह्रीकरस्यामरासा -
    सा रामस्याङ्घ्रिमभ्याजति न न नतिजस्थूलमुत्रातके सा ॥ **30.30** ॥

रम्ये वेश्मनि पापराक्षसभिदास्वासक्तधीनायिका
    नन्तुं कर्मजदुर्मदालसधियां सा हन्त नाथीकृता।
सद्धाटभ्रमिकासु तापसतपोविस्रम्भभूयन्त्रिका
    काचित्स्वैरगमेन केळिसमये कामव्रता पादुका ॥ **30.31** ॥

श्रीसंवेदनकर्मकृद्धसु तव स्यामृद्धधैर्यस्फुटः
    श्रीपादावनि विस्तृतासि सुखिनी त्वं गेययातायना।
वेदान्तानुभवातिपातिसुतनुः सान्द्रेड्यभावप्रथे -
    ऽङ्कस्था चाच्युतदिव्यदास्यसुमतिः प्राणस्थसीताधन ! ॥ **30.32** ॥

कनकपीठनिविष्टतनुस्तदा
    सुमतिदायिनिजानुभवस्मृता।
विधिशिवप्रमुखैरभिवन्दिता
    विजयते रघुपुङ्गवपादुका ॥ **30.33** ॥

दीनगोपीजनिक्लिष्टभीनुत् सदा
    रामपादावनि ! स्वानुभावस्थिता।

एधि मेऽवश्यमुत्तारभावश्रिता
    तेजसा तेन घुष्टिं गता पालिका ॥ **30.34** ॥

धामनिराकृततामसलोका
    धातृमुखैर्विनता निजदासैः।
पापमशेषमपाकुरुषे मे
    पादु ! विभूषितराघवपादा ॥ **30.35** ॥

कृपानघत्रातसुभूरदुष्टा मेध्या रुचा पारिषदामभूपा।
पादावनि ! स्त्यानसुखैर्न तृप्ता कान्त्या समेताधिकृताऽनिरोधा ॥ **30.36** ॥

सारससौख्यसमेता ख्याता पदपा भुवि स्वाज्ञा।
साहसकार्यवनाशा धीरा वसुदा नवन्यासा ॥ **30.37** ॥

सान्याऽवनदा सुवराऽधीशाना वर्यका सहसा।
ज्ञा स्वा विभुपादपताख्याता मे सख्यसौ सरसा ॥ **30.38** ॥

तारस्फारतर स्वररसभररा सा पदावनी सारा।
धीरस्वैरचरस्थिर रघुपुर वासरति रामसवा ॥ **30.39** ॥

चरमचरं च नियन्तुः चरणावनिदम्परेतरा शौरेः।
चरमपुरुषार्थचित्रौ चरणावनि ! दिशसि चत्वरेषु सताम् ॥ **30.40** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे चित्रपद्धतिः त्रिंशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥